# Shri Ganesha Stotram Vishvasahakritam

# વિશ્વસહકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Vishvasahakritam

File name : gaNeshastotramvishvasahakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 26 | 8.26 30-53||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# વિશ્વસહકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
વિઘ્નેશાય નમસ્તુભ્યં પરાત્પરતમાય ચ ।
હેરમ્બાય ગણેશાય ગણાનાં પતયે નમઃ ॥ ૩૦॥
માયાકારશરીરાય માયિકશિરસે નમઃ ।
તયોર્યોગે સુદેહાય ગજાનન નમોઽસ્તુ તે ॥ ૩૧॥
રાજસાય નમસ્તુભ્યં સૃષ્ટિકર્ત્રે કૃપાલવે ।
સાત્ત્વિકાય સદા સર્વપાલકાય નમો નમઃ ॥ ૩૨॥
તામસાય જનાનાં તુ સંહર્ત્રે કાલરૂપિણે ।
કર્મણે ત્રિસ્વરૂપાય નમોઽહઙ્કૃતિધારિણે ॥ ૩૩॥
ચાલકાય મહામોહદાયિને શક્તિરૂપિણે ।
ગુણેશાય ગુણાનાં વૈ સત્તાધારાય તે નમઃ ॥ ૩૪॥
બિન્દુમાત્રશરીરાય સોઽહઙ્કારાય દેહિને ।
બોધાય પ્રકૃતિસ્થાય ખેલકાય નમો નમઃ ॥ ૩૫॥
વિદેહાય પરેશાય સ્વાનન્દાય નમોઽસ્તુ તે ।
અયોગાય સુશાન્તાય યોગેશાય નમો નમઃ ॥ ૩૬॥
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યોગશાન્તિસ્વરૂપિણમ્ ।
તવ દર્શનજેનૈવ બોધેન સ્તુતવાનહમ્ ॥ ૩૭॥
એવમુક્ત્વા વિશ્વસહો નનામૈવ ગજાનનમ્ ।
તમુત્થાપ્ય ગણાધીશસ્તં જગાદ હિતં વચઃ ॥ ૩૮॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતં મદીયં તુ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
પઠતાં શ ૃણ્વતાં નિત્યં ભક્તિવર્ધનમુત્તમમ્ ॥ ૩૯॥
યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રપાઠતઃ ।
ભુક્તિમુક્તિપ્રદં બ્રહ્મદાયકં શ્રવણાદ્ભવેત્ ॥ ૪૦॥

મયિ ભક્તિર્દૃઢા તે વૈ ભવિષ્યતિ સુખપ્રદા ।
યદ્યદિચ્છસિ તત્તત્તે સફલં હ્યસ્તુ સર્વદા ॥ ૪૧॥
એવમુક્ત્વા ગણાધીશોંઽતર્દધે તસ્ય પશ્યતઃ ।
વિશ્વસહો ગણેશસ્ય ભજને તત્પરોઽભવત્ ॥ ૪૨॥
ગાણપત્યાગ્રણીઃ સોઽપિ બભૂવ મુદ્ગલોપમઃ ।
સદા માઘવ્રતે સંસ્થો ગાણેશપઞ્ચકે રતઃ ॥ ૪૩॥
અન્યચ્છૃણુ મહચ્ચિત્રં ચરિત્રં માસસમ્ભવમ્ ।
સર્વપાપહરં વિપ્ર શ્રવણાત્ સુખદં ભવેત્ ॥ ૪૪॥
ચાણ્ડાલઃ કોઽપિ નીલાખ્યઃ શ્રુત્વા ગણપતેઃ કથામ્ ।
માઘસ્નાનપરો ભૂત્વા વ્યવસાયં ચકાર હ ॥ ૪૫॥
સ્નાત્વા પ્રાતસ્તતઃ સોઽપિ વ્યવસાયપરોઽભવત્ ।
રાત્રૌ ગીતં ગણેશસ્ય ગાયતિ સ્મ નિરન્તરમ્ ॥ ૪૬॥
એવં ગીતં માઘમાસે ગણેશં દેવમન્દિરે ।
ગત્વા ગાયન્ પુનઃ સોઽપિ કુટુમ્બભરણે રતઃ ॥ ૪૭॥
એકદા કાર્યસંસ્થઃ સ માઘમાસે બભૂવ હ ।
યામમાત્રગતાયાં તુ યયૌ રાત્રૌ ગણેશ્વરમ્ ॥ ૪૮॥
પ્રણમ્ય વિઘ્નહર્તારં ગીતં ગીત્વા સ્વમન્દિરમ્ ।
જગામ માર્ગમધ્યસ્થં પિશાચાઃ પઞ્ચ તં યયુઃ ॥ ૪૯॥
દૃષ્ટ્વા ક્રૂરતરાંસ્તાન્ સ સસ્માર ગણનાયકમ્ ।
ગણેશસ્મૃતિમાત્રેણ પિશાચાઃ સ્તમ્ભિતા બભુઃ ॥ ૫૦॥
તતોઽતિવિસ્મિતાઃ સર્વે પિશાચાસ્તમલોકયન્ ।
અવલોકનપુણ્યેન શુદ્ધાન્તરા બભૂવિરે ॥ ૫૧॥
જગુસ્તં નીલકં વાક્યં પિશાચા દુઃખસંયુતાઃ ।
તારયસ્વ મહાભાગ સંસારાન્નઃ પિશાચકાન્ ॥ ૫૨॥
તવ દર્શનમાત્રેણ શુદ્ધા જાતા વયં કિલ ।
તવ ગાનફલં દેહિ તેન મુક્તા ભવામહે ॥ ૫૩॥

ઇતિ વિશ્વસહકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૬ । ૮.૨૬ ૩૦-૫૩॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 26 . 8.26 30-53..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Vishvasahakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*